**पृथु** त्रि० प्रथ–कु सम्प्र० । १विस्तीर्णे स्त्रियां गुणवचनत्वात् ङीष् । २आदिराजे वेनपुत्रे सूर्य्यवंश्ये नृपभेदे पु० तदुत्पत्तिकथा भाग० ४।१५ अ० ।

अथ तस्य (वेनस्य) पुनर्विप्रैरपुत्रस्य महीपतेः । बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत । तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः । ऊचुः परमसन्तुष्टा विदित्वा भगवत्कलाम् । एष विष्णोर्भगवतः कला भुवनपालिनी । इयञ्च लक्ष्मीः संभूतिः पुरुषस्यानपायिनी । अत्र यः प्रथमो राज्ञां पुमान् प्रथयिता यशः । पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः" । तेन च भगवदवतारेण पृथिवी समीकृता नानौषधीश्च मथिता दुहितृत्वेन कल्पिता च ।

तत्कथा उत्तरत्राध्याये दृश्या ४।१८ अ० ।

"एवं पृथ्वादयः पृथ्वीं दुदुहुः स्वस्वमात्मनः । दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ! । ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः । दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः । चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट् । भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः" ३महादेवे भा० आनु० ८ अ० । चतुर्थमन्वन्तरे काव्ये ४सप्तर्षिभेदे हरिवं० ७अ० । काकुत्स्थे अनेनसः पुत्रे ५नृपभेदे १७अ० । अजमीढवंश्ये पारस्य ६पुत्रभेदे हरिवं० २० अ० । क्रोष्टुवंश्ये चित्ररथस्य पुत्रे ७नृपभेदे ३५ अ० । ८दानवभेदे २६अ० । ९अग्नौ मेदि० । १०कृष्णजीरके पु० अमरः ११त्वक्पर्ण्यां १२हिङ्गुपत्र्याञ्च स्त्री मेदि०१३अहिफेने शब्दरत्ना० १४महति त्रि० शब्दर० १५विष्णौ पुं० । "प्राणदः प्रणवः पृथुः" विष्णुस० ।

**पृथुक** पु० पृथु कं जलं मेयत्वेनास्त्यस्य अच् । १चिपिटके अमरः । तस्य चर्वणे बहुजलशोषणात् तस्य तथात्वम् । अस्य क्लीवत्वमपि "द्विःखिन्नमन्नं पृथुकं शुद्धं देशविशेषके" ब्रह्मवै०ख०२१अ० । पृथु कं शिरोऽस्य । २बालके पुंस्त्री० मेदि० । ३हिङ्गुपत्र्यां स्त्री शब्दरत्ना० ।

**पृथुकीय** त्रि० पृथुकाय हितं अपूपा०छ । पृथुकहिते । पक्षे यत् पृथुक्य तत्रार्थे त्रि० ।

**पृथुकीर्त्ति** स्त्री पृथानुजायाम् वसुदेवभगिनीभेदे "पृथुकीर्त्त्यां तु संजज्ञे तनयो वृद्धशर्मणः । करूषाधिपतिर्वीरो दन्तवक्त्रो महाबलः" । हरिवं० ३७ अ० पृथुः कीर्त्तिरस्य । २तद्युक्ते त्रि० ।

**पृथुकोल** पु० कर्म० । राजबदरे राजनि० ।

**पृथुग्रीव** पु० १राक्षसभेदे रामा०आ०२६स० । २विस्तीर्णग्रीवे त्रि०

**पृथुच्छद** पु० पृथुः छदोऽस्य । १दर्भे राजनि० । २वृहत्पत्रयुक्ते त्रि० ।

**पृथुपत्र** पु० पृथूनि पत्राण्यस्य । रक्तलशुने राजनि० ।

**पृथुपलाशिका** स्त्री पृथूनि पलाशान्यस्याः कप् कापि अत इत्वम् । शट्याम् राजनि० ।

**पृथुरुक्म** पु० क्रोष्टुवंश्ये रुक्मकवचपुत्रभेदे हरिवं० ३७अ० ।

**पृथुरोमन्** पु० पृथूनि रोमाणि रोमस्थानीयशल्कान्यस्य । १मत्स्ये अमरः । २वृहल्लोमयुक्ते त्रि० स्त्रियां वा ङाप् ।

**पृथुल** त्रि० पृथु+स्वार्थे लच् पृथुः पृथुत्वमस्त्यस्य सिध्मा० लच् वा । १स्थूले अमरः । २हिङ्गुपत्र्यां स्त्री जटाध० ।

**पृथुलाक्ष** त्रि० पृथुले अक्षिणी यस्य षच्समा० । १वृहन्नेत्रयुक्ते २पुरुवंश्ये चतुरङ्गपुत्रभेदे पु० हरिवं० ३१ अ० ।

**पृथुवक्त्र** त्रि० पृथु वक्त्रमस्य । १वृहन्मुखयुक्ते । २कुमारानुचरमातृभेदे स्त्री भा० श० ४७ अ० ।

**पृथुशिम्ब** पु० पृथ्वी शिम्बा यस्य । श्योनाकभेदे राजनि० ।

**पृथुशेखर** पु० पृथु शेखरं यस्य । पर्वते त्रिका० ।

**पृथुश्रव(स)** त्रि० पृथु श्रवः कर्णोऽस्य । १वृहत्कर्णे अदन्तः २कुमारानुचरभेदे भा० श० ४६ अ० । सान्तस्तु । ३शशबिन्दुनृपपुत्रभेदे पु० हरिवं०३६अ० ।

**पृथुसेन** पु० अनुवंश्ये रुचिरनृपपुत्रभेदे हरिवं० २० अ० ।

**पृथुस्कन्ध** पुंस्त्री पृथुः स्कन्धोऽस्य । शूकरे राजनि० स्त्रियां जातित्वात् ङीष् ।

**पृथूदक** न० तीर्थभेदे भा० व० ८३ अ० ।

तच्च सरस्वत्यां देशस्थितम् यथोक्तम् "जातिस्मरो रुशङ्गुस्तु गङ्गाद्वारे सदास्थितः । अन्तकाले ततो दृष्ट्वा पुत्रान् वचनमब्रवीत् । इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् । विज्ञाय तस्य तद्भावं रुषङ्गोस्ते तपोधनाः । तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् । स तैः पुत्रैः समानीतः सरस्वत्यां समीपतः । स्तुत्वा तीर्थगुणान् सर्वान् प्राहेदमृषिसत्तमः । सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् । पृथूदके जन्म परो नैनं श्वो मरणं लभेत् । तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिता" वामनपु० ३८ अ० ।

**पृथूदर** पुंस्त्री० पृथु उदरं यस्य । १मेषे स्त्रियां जातित्वात् ङीष् । २वृहत्कुक्षौ त्रि० हारा० । स्त्रियां स्वाङ्गत्वात् वा ङीष् ।

**पृथ्वादि** पु० "पृथ्वादिभ्य इमनिज् वा" पा० भावे इमनिज्प्रत्ययनिमित्ते शब्दगणे स च पा०ग० उक्तो यथा